# चरक  निदान 2 – रक्तपित्त निदान

VD. SNEHA GHODKE

# रक्तपित्त निदान

- रक्तपित्त=पित्तं यथाभूतं लोहितपित्तमिति सञ्ज्ञां लभते, तद् [१] व्याख्यास्यामः||३|

यदा जन्तुर्यवकोद्दालककोरदूषप्रायाण्यन्नानि भुङ्क्ते, भृशोष्णतीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थसूपक्षारोपसंहितं, दधिदधिमण्डोदश्वित्कट्वराम्लकाञ्जिकोपसेकं [१] वा, वाराहमाहिषाविकमात्स्यगव्यपिशितं, पिण्याकपिण्डालुशुष्कशाकोपहितं, मूलकसर्षपलशुनकरञ्जशिग्रुमधुशिग्रु(खडयूष [२] ) भूस्तृणसुमुखसुरसकुठेरकगण्डीरकालमालकपर्णासक्षवकफणिज्झकोपदंशं, सुरासौवीरतुषोदकमैरेयमेदकमधूलकशुक्तकुवलबदराम्लप्रायानुपानं वा, पिष्टान्नोत्तरभूयिष्ठम्; उष्णाभितप्तो वाऽतिमात्रमतिवेलं वाऽऽमं पयः पिबति, पयसा समश्नाति रौहिणीकं [३] , काणकपोतं वा सर्षपतैलक्षारसिद्धं, कुलत्थपिण्याकजाम्बवलकुचपक्वैः शौक्तिकैर्वा सह क्षीरं पिबत्युष्णाभितप्तः [४] ; तस्यैवमाचरतः पित्तं प्रकोपमापद्यते, लोहितं च [५] स्वप्रमाणमतिवर्तते|

तस्मिन् प्रमाणातिवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदेव [६] यकृत्प्लीहप्रभवाणां लोहितवहानां च स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य प्रतिरुन्ध्यात् [७] तदेव [८] लोहितं दूषयति||४|

# रक्तपित्त संप्राप्ती

- हेतुसेवन
- पित्त प्रकोप आपद्यते
- लोहितं च स्वप्रमाणं अतिवर्तते
- तस्मिन् प्रमाणातिवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदेव
- यकृत्प्लीहप्रभवाणां लोहितवहानां च स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य  प्रतिरुन्ध्यात्
- तदेव लोहितं दूषयति

# निरुक्ति

- संसर्गाल्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च [१] पित्तं लोहितपित्तमित्याचक्षते॥५॥

# पूर्वरूप

- तस्येमानि पूर्वरूपाणि भवन्ति; तद्यथा- अनन्नाभिलाषः, भक्तस्य विदाहः, शुक्ताम्लगन्धरस उद्गारः, छर्देरभीक्ष्णमागमनं, छर्दितस्य बीभत्सता, स्वरभेदो, गात्राणां सदनं, परिदाहः, मुखाद्धूमागम इव, लोहलोहितमत्स्यामगन्धित्वमिव चास्यस्य, रक्तहरितहारिद्रत्वमङ्गावयवशकृन्मूत्रस्वेदलालासिङ्घाणकास्यकर्णमलपिडकोलिकापिडकानाम [१] , अङ्गवेदना, लोहितनीलपीतश्यावानामर्चिष्मतां च रूपाणां स्वप्ने दर्शनमभीक्ष्णमिति (लोहितपित्तपूर्वरूपाणि [२] भवन्ति)||६||

# उपद्रव

- दौबल्य
- अरोचक, अविपाक
- श्वास,कास
- ज्वर ,अतिसार
- शोफ
- शोष
- पाण्डु
- स्वरभेद

# रक्तपित्त मार्ग

- द्वौ – उर्ध्व,अधो
- तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्ध्वं प्रतिपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते,
- बहुवाते तु शरीरे वातसंसर्गादधः प्रतिपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते,
- बहुश्लेष्मवाते तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रतिपद्यते, तौ मार्गौ प्रतिपद्यमानं
- सर्वेभ्य एव यथोक्तेभ्यः खेभ्यः प्रच्यवते शरीरस्य||८|| |

# साध्यासाध्यत्व

- तत्र यदूर्ध्वभागं तत् साध्यं, विरेचनोपक्रमणीयत्वाद्बह्वौषधत्वाच्च;
- यदधोभागं तद्याप्यं, वमनोपक्रमणीयत्वादल्पौषधत्वाच्च;
- यदुभयभागं तदसाध्यं, वमनविरेचनायोगित्वादनौषधत्वाच्चेति||९||

# रक्तपित्ताचे ऐतिहासिक कारण

- रक्तपित्तप्रकोपस्तु खलु पुरा दक्षय ज्ञोद्ध्वंसे रुद्रकोपामर्षाग्निना [१] प्राणिनां परिगतशरीरप्राणानामभव ज्ज्वरमनु॥१०॥

# रक्तपित्त चिकित्सासूत्र

- तस्याशुकारिणो दावाग्नेरिवापतितस्यात्ययिकस्याशु प्रशान्त्यै प्रयतितव्यं मात्रां देशं कालं चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुरशिशिरतिक्तकषायैरभ्यवहार्यैः प्रदेहपरिषेकावगाहसंस्पर्शनैर्वमनाद्यैर्वा तत्रावहितेनेति

# उर्ध्व रक्तपित्ताचे साध्यतेचे हेतु

- साध्यं लोहितपित्तं तद्यदूर्ध्वं प्रतिपद्यते|
  विरेचनस्य योगित्वाद्बहुत्वाद्भेषजस्य च||१२||
  विरेचनं तु पित्तस्य जयार्थे परमौषधम्|
  यश्च तत्रान्वयः [१] श्लेष्मा तस्य चानधमं स्मृतम्||१३||
  भवेद्योगावहं तत्र मधुरं [२] चैव भेषजम्|
  तस्मात् साध्यं मतं रक्तं यदूर्ध्वं प्रतिपद्यते

# अधोग रक्तपित्ताची याप्यता

- रक्तं तु यदधोभागं तद्याप्यमिति निश्चितम्|
वमनस्याल्पयोगित्वादल्पत्वाद्भेषजस्य च||१५||
वमनं हि न पित्तस्य हरणे [१] श्रेष्ठमुच्यते|
यश्च तत्रान्वयो [२] वायुस्तच्छान्तौ चावरं स्मृतम्||१६||
तच्चायोगावहं [३] तत्र कषायं तिक्तकानि च|
तस्माद्याप्यं समाख्यातं यदुक्तमनुलोमगम् [४] ||१७||

# उभय रक्तपित्ताची असाध्यता

- रक्तपित्तं तु यन्मार्गौ द्वावपि प्रतिपद्यते|
  असाध्यमिति तज्ज्ञेयं पूर्वोक्तादेव कारणात्||१८||
  नहि संशोधनं किञ्चिदस्त्यस्य प्रतिमार्गगम्|
  प्रतिमार्गं च हरणं रक्तपित्ते विधीयते||१९||
  एवमेवोपशमनं सर्वशो नास्य विद्यते|
  संसृष्टेषु च दोषेषु सर्वजिच्छमनं मतम् [१] ||२०||
  इत्युक्तं त्रिविधोदर्कं रक्तं मार्गविशेषतः|२१|

# साधारण रोगाच्या असाध्यतेची कारणे

- एभ्यस्तु खलु हेतुभ्यः किञ्चित्साध्यं न सिध्यति||२१||
  प्रेष्योपकरणाभावाद्दौरात्म्याद्वैद्यदोषतः|
  अकर्मतश्च साध्यत्वं कश्चिद्रोगोऽतिवर्तते||२२||
  तत्रासाध्यत्वमेकं स्याात् साध्ययाप्यपरिक्रमात्

# लक्षणांवरून रक्तपित्ताचे असाध्यत्व

- यत् कृष्णमथवा नीलं यद्वा शक्रधनुष्प्रभम्|
  रक्तपित्तमसाध्यं तद्वाससो रञ्जनं च यत्||२४||
  भृशं पूत्यतिमात्रं च सर्वोपद्रववच्च यत्|
  बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत्||२५||
  येन चोपहतो रक्तं रक्तपित्तेन मानवः|
  पश्येद्दृश्यं वियच्चापि तच्चासाध्यं न संशयः||२६||

# रक्तपित्ताची प्रत्याख्येयता

- तत्रासाध्यं परित्याज्यं, याप्यं यत्नेन यापयेत्|
साध्यं चावहितः सिद्धैर्भेषजैः साधयेद्भिषक्||२७||

- Thank you